# 10 पञ्चशील-सिद्धान्ताः

पञ्चशीलमिति शिष्टाचारविषयकाः सिद्धान्ताः। महात्मा गौतमबुद्धः एतान् पञ्चापि सिद्धान्तान् पञ्चशीलमिति नाम्ना स्वशिष्यान् शास्ति स्म। अतएवायं शब्दः अधुनापि तथैव स्वीकृतः। इमे सिद्धान्ताः क्रमेण एवं सन्ति–

१. अहिंसा।
२. सत्यम्।
३. अस्तेयम्।
४. अप्रमादः।
५. ब्रह्मचर्यम् इति।

बौद्धयुगे इमे सिद्धान्ताः वैयक्तिकजीवनस्य अभ्युत्थानाय प्रयुक्ता आसन्। परमद्य इमे सिद्धान्ताः राष्ट्राणां परस्परमैत्रीसहयोगकारणानि, विश्व-बन्धुत्वस्य विश्वशान्तेश्च साधनानि सन्ति। राष्ट्रनायकस्य श्रीजवाहरलालनेहरूमहोदयस्य प्रधानमन्त्रित्वकाले चीनदेशेन सह भारतस्य मैत्री पञ्चशीलसिद्धान्तानधिकृत्य एवाभवत्। यतो हि उभावपि देशौ बौद्धधर्मे निष्ठावन्तौ। आधुनिके जगति पञ्चशीलसिद्धान्ताः नवीनं राजनैतिकं स्वरूपं गृहीतवन्तः। एवं च व्यवस्थिताः–

१. किमपि राष्ट्रं कस्यचनान्यस्य राष्ट्रस्य आन्तरिकेषु विषयेषु कीदृशमपि व्याघातं न करिष्यति।
२. प्रत्येकराष्ट्रं परस्परं प्रभुसत्तां प्रादेशिकीमखण्डताञ्च सम्मानयिष्यति।
३. प्रत्येकराष्ट्रं परस्परं समानतां व्यवहरिष्यति।
४. किमपि राष्ट्रमपरेण नाक्रंस्यते।
५. सर्वाण्यपि राष्ट्राणि मिथः स्वां स्वां प्रभुसत्तां शान्त्या रक्षिष्यन्ति।

विश्वस्य यानि राष्ट्राणि शान्तिमिच्छन्ति तानि इमान् नियमानङ्गीकृत्य परराष्ट्रैस्सार्द्धं स्वमैत्रीभावं दृढ़ीकुर्वन्ति।

## अभ्यास प्रश्न

### लघु उत्तरीय प्रश्न

१. आधुनिके जगति पञ्चशीलसिद्धान्तस्य किं स्वरूपं गृहीतवन्तः?
२. महात्मनः गौतमबुद्धस्य पञ्चशील सिद्धान्ताः के सन्ति?
३. गौतमबुद्ध कान् सिद्धान्तान् अशिक्षयत्? **[2017 MI, MJ]**

४. बौद्धयुगे पञ्चशील सिद्धान्ता: कस्य हेतो: प्रयुक्ता: आसन्? [2016 SM]
५. चीनदेशेन सह भारतस्य मैत्री कान् सिद्धान्तानधिकृत्य अभवत्?
६. के पञ्चशील सिद्धान्ता आसन्?
७. भारत-चीन-देशौ कस्मिन् धर्मे निष्ठावन्तौ? [2017 MN, 20 ZG]
८. पंचशीलमिति कीदृश: सिद्धान्ता:? [2019 CM]

## अनुवादात्मक प्रश्न

१. **निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**
(क) पञ्चशीलमिति....................ब्रह्मचर्यम् इति।
(ख) बौद्धयुगे इमे ......................... एवाभवत्। [2017 MH, 19 CR, सा०2020 ZM]
अथवा बौद्धयुगे इमे .........................निष्ठावन्तौ। [2017 MJ, MM, 19 CO]
(ग) परमद्य इमे .......................... निष्ठावन्तौ। [सा०2020 ZH]
(घ) बौद्धयुगे ............................ व्यवस्थिता:।
(ङ) आधुनिके जगति रक्षयिष्यन्ति।
२. **निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**
(क) उभावपि देशौ बौद्धधर्मे निष्ठावन्तौ।
(ख) किमपि राष्ट्रमपरेण नाक्रंस्यते।
३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**
(क) पञ्चशील शिष्टाचार सम्बन्धी सिद्धान्त है।
(ख) ये सिद्धान्त क्रमश: इस प्रकार हैं।

## व्याकरणात्मक प्रश्न

१. **निम्नलिखित में सन्धि-विच्छेद कीजिए—**
नैष:, शब्दस्यैतस्य, पञ्चाशदधिके, द्वयोरपि, राष्ट्रैस्सार्धम्।
२. **निम्नलिखित में विभक्ति एवं वचन बताइए—**
तस्मात्, एतस्य, युगे, कारणात्, सर्वाणि, प्रादुर्भूतस्य।

## शब्दार्थ

**उभावपि** = उभौ + अपि = दोनों ही। **निष्ठावन्तौ** = विश्वास रखनेवाले हैं। **व्याघातंर**= हस्तक्षेप। **नाक्रंस्यते** = आक्रमण नहीं किया जायगा। **मिथ:** = आपस में। **कस्यचनान्यस्य** = (कस्यचन + अन्यस्य) अन्य किसी के। **प्रादेशिकीमखण्डताञ्च** = (प्रादेशिकीम् + अखण्डताम्**र**+ च) और प्रादेशिक अखण्डता का। **सर्वाण्यपि** = (सर्वाणि + अपि) सभी। **परराष्ट्रैस्सार्धम्** = (पर-राष्ट्रै:+ सार्धम्) दूसरे राष्ट्रों के साथ।